# ॥ गोदाष्टोत्तरशतनामावलिः ॥

श्रीरङ्गनायक्यै नमः
गोदायै नमः
विष्णुचित्तात्मजायै नमः
सत्यै नमः
गोपीवेषधरायै नमः
देव्यै नमः
भूसुतायै नमः
भोगशालिन्यै नमः
तुलसीकाननोद्भूतायै नमः
श्रीधन्विपुरवासिन्यै नमः १०
भट्टनाथप्रियकर्यै नमः
श्रीकृष्णहितभोगिन्यै नमः
आमुक्तमाल्यदायै नमः
बालायै नमः
रङ्गनाथप्रियायै नमः
परायै नमः
विश्वम्भरायै नमः
कलालापायै नमः
यतिराजसहोदर्यै नमः
कृष्णानुरक्तायै नमः २०
सुभगायै नमः
सुलभश्रियै नमः
सलक्षणायै नमः
लक्ष्मीप्रियसख्यै नमः
श्यामायै नमः
दयाञ्चितदृगञ्चलायै नमः
फल्गुन्याविर्भवायै नमः
रम्यायै नमः
धनुर्मासकृतव्रतायै नमः
चम्पकाशोक-पुन्नाग-मालती-
विलसत्-कचायै नमः ३०
आकारत्रयसम्पन्नायै नमः
नारायणपदाश्रितायै नमः
श्रीमदष्टाक्षरीमन्त्र-राजस्थित-
मनोरथायै नमः
मोक्षप्रदाननिपुणायै नमः
मनुरत्नाधिदेवतायै नमः
ब्रह्मण्यायै नमः
लोकजनन्यै नमः
लीलामानुषरूपिण्यै नमः

ब्रह्मज्ञानप्रदायै नमः
मायायै नमः ४०
सच्चिदानन्दविग्रहायै नमः
महापतिव्रतायै नमः
विष्णुगुणकीर्तनलोलुपायै नमः
प्रपन्नार्तिहरायै नमः
नित्यायै नमः
वेदसौधविहारिण्यै नमः
श्रीरङ्गनाथमाणिक्यमञ्जर्यै नमः
मञ्जुभाषिण्यै नमः
पद्मप्रियायै नमः
पद्महस्तायै नमः ५०
वेदान्तद्वयबोधिन्यै नमः
सुप्रसन्नायै नमः
भगवत्यै नमः
श्रीजनार्दनदीपिकायै नमः
सुगन्धवयवायै नमः
चारुरङ्गमङ्गलदीपिकायै नमः
ध्वजवज्राङ्कुशाब्जाङ्क-मृदुपाद-
लताञ्चितायै नमः
तारकाकारनखरायै नमः
प्रवालमृदुलाङ्गुल्यै नमः
कूर्मोपमेय-पादोर्ध्वभागायै नमः ६०
शोभनपार्ष्णिकायै नमः
वेदार्थभावतत्त्वज्ञायै नमः
लोकाराध्याङ्घ्रिपङ्कजायै नमः
आनन्दबुद्बुदाकार-सुगुल्फायै नमः
परमायै नमः
अणुकायै नमः
तेजःश्रियोज्ज्वलधृतपादाङ्गुलि-
सुभूषितायै नमः
मीनकेतन-तूणीर-चारुजङ्घा-
विराजितायै नमः
ककुद्वज्जानुयुग्माढ्यायै नमः
स्वर्णरम्भाभसक्थिकायै नमः ७०
विशालजघनायै नमः
पीनसुश्रोण्यै नमः
मणिमेखलायै नमः
आनन्दसागरावर्त-गम्भीराम्भोज-
नाभिकायै नमः
भास्वद्वलित्रिकायै नमः
चारुजगत्पूर्ण-महोदर्यै नमः
नववल्लीरोमराज्यै नमः
सुधाकुम्भायितस्तन्यै नमः

कल्पमालानिभबुजायै नमः
चन्द्रखण्डनखाञ्चितायै नमः ८०
सुप्रवाशाङ्गुलीन्यस्तमहा-
रत्नाङ्गुलीयकायै नमः
नवारुणप्रवालाभ-पाणिदेश-
समञ्चितायै नमः
कम्बुकण्ठ्यै नमः
सुचुबुकायै नमः
बिम्बोष्ठ्यै नमः
कुन्ददन्तयुजे नमः
कारुण्यरस-निष्यन्द-नेत्रद्वय-
सुशोभितायै नमः
मुक्ताशुचिस्मितायै नमः
चारुचाम्पेयनिभनासिकायै नमः
दर्पणाकार-विपुल-कपोल-
द्वितयाञ्चितायै नमः ९०
अनन्तार्क-प्रकाशोद्यन्मणि-
ताटङ्क-शोभितायै नमः
कोटिसूर्याग्निसङ्काश-नानाभूषण-
भूषितायै नमः
सुगन्धवदनायै नमः
सुभ्रुवे नमः
अर्धचन्द्रललाटिकायै नमः
पूर्णचन्द्राननायै नमः
नीलकुटिलालकशोभितायै नमः
सौन्दर्यसीमायै नमः
विलसत्-कस्तूरी-
तिलकोज्ज्वलायै नमः
धगद्ध-गायमानोद्यन्मणि-सीमन्त-
भूषणायै नमः १००
जाज्वल्यमान-सद्रत्न-
दिव्यचूडावतंसकायै नमः
सूर्यार्धचन्द्र-विलसत्-भूषणञ्चित-
वेणिकायै नमः
अत्यर्कानल-तेजोधिमणि-
कञ्चुकधारिण्यै नमः
सद्रत्नाञ्चितविद्योत-विद्युत्कुञ्जाभ-
शाटिकायै नमः
नानामणिगणाकीर्ण-
हेमाङ्गदसुभूषितायै नमः
कुङ्कुमागरु-कस्तूरी-दिव्यचन्दन-
चर्चितायै नमः
स्वोचितौज्ज्वल्य-विविध-विचित्र-
मणि-हारिण्यै नमः

असङ्ख्येय-सुखस्पर्श-सर्वातिशय-
भूषणायै नमः
मल्लिका-पारिजातादि

दिव्यपुष्प-स्रगञ्चितायै नमः
श्रीरङ्गनिलयायै नमः १ १०
पूज्यायै नमः
दिव्यदेशसुशोभितायै नमः

॥ इति श्री गोदाष्टोत्तरशतनामावलिः सम्पूर्णा ॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Goda_Ashtottara_Shatanamavali. This PDF was downloaded from http://stotrasamhita.github.io/

Facebook: http://facebook.com/StotraSamhita

GitHub: http://stotrasamhita.github.io/ | http://github.com/stotrasamhita

Credits: http://stotrasamhita.net/wiki/StotraSamhita:About